"अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृतिः।

**स्नान** न॰ स्ना-भावे ल्युट्। १शोधने २अवगाहने ३मज्जने च तच्च मन्त्रादिकारणभेदादष्टविधं स्ना॰ त॰ तत्प्रकार-भेदादिकं च दर्शितं यथा "दक्षः "चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकुशादीनि स्नानार्थञ्चाकृत्रिमे जले"। कुर्य्यादिति शेषः। तथा च "अस्नात्वा चाप्यहुत्वा च भुङ्क्तेऽदत्त्वा च यो नरः। देवादीनामृणी भूत्वा नरकं प्रतिपद्यते"। "अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन। लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान्। अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः। स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनम्। प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं हि तत्। सर्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम्। अज्ञानाद् यदि वा मोहात् रात्रौ दुश्चरितं कृतम्। प्रातःस्नानेन तत् सर्वं शोधयन्ति द्विजातयः"। दृष्टं मलापकर्षादि अदृष्टं प्रत्यवायपरीहारादि। प्रातः सूर्य्योदयात् प्राक्कालः "प्रातः स्नायादरुणकिरणग्रस्तां प्राचीमवलोक्य स्नायात्" इति विष्णूक्तेः। प्रातःस्नाने मध्याह्नस्नानधर्मातिदेशमाह कात्यायनः "यथाहनि तथाप्रातर्नित्यं स्नायादनातुरः। दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत्"। यथा तथेतिकर्त्तव्यतया। सा च "आचरेदुषसि स्नानं तर्पयेद्देवमानुषान्" इति जावाल्युक्ता। वैदिके कर्मणि वामहस्ते बहुतरकुशान् दक्षिणेन पवित्रं धारयेत्। तथा च छन्दोगपरिशिष्टम् "हस्वाः प्रचरणीयाः स्युः कुशा दीर्घास्तु वर्हिषः। दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्मसु। सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः"। प्रचरणीयाः पार्वणश्राद्धयज्ञादिकर्मानुष्ठानार्हाः। बर्हिषः यज्ञाद्यास्तरणार्थाः। यतस्तत्तत्कर्मसु कुशविशेषा उक्ताः। अतः सन्ध्यादिकर्मसु अवस्थाविशेषशून्याः कुशाः पवित्रम्। सोपग्रहः बहुतरकुशयुक्तः सपवित्रको विशिष्टद्विदलयुक्तः। विशेषमाह स एव "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्"। अनन्तर्गर्भिणं अन्तर्गर्भशून्यम्। तथा च शौनकः "अनन्तर्गर्भिणौ यौ तु कुशौ प्रादेशसम्मितौ। अनखच्छेदिनौ साग्रौ तौ पवित्राभिधायकौ"। "एतदभावे कुशपत्रचतुष्टयं त्रयं वा समुद्रकरधृतवचनात्। तद् यथा "चतुर्भिर्दर्भपत्रैश्च त्रिभिर्द्वाभ्यामथापि वा। पवित्रं कारयेन्नित्यं प्रशस्तं सर्वकर्मसु"। विद्याकरवाजपेयिधृतम् "पवित्रन्तु द्विजः कुर्य्यात् कुशपत्रद्वयेन वा। पत्रत्रयेण वा कार्य्यं नैकपत्रेण कुत्रचित्"। एतद्दर्शनात् दर्भाःपवित्रमित्यत्रैवमपि व्याख्येयम् मार्कण्डेयः "सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः। श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः। सप्तमीं नवमीञ्चैव पर्वकालञ्च वर्जयेत्"। विष्णुधर्मोत्तरे "त्वराक्रोधौ तथा दक्षौ दैवकर्मणि पण्डितैः। इक्षुरापः पयश्चैव ताम्बूलं फलमौषधम्। भक्षयित्वा तु कर्त्तव्याः स्नानदानादिकाः क्रियाः"। भविष्योत्तरे "स्नातस्तु वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत्। भुञ्जानस्य यमस्त्वायुस्तस्मान्न व्याहरेत् त्रिषु"। स्नातुः स्नानं कुतः। अशुचेरवगाहनानन्तरं स्नानमाह योगियाज्ञवल्क्यः "तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः। आचम्य तु ततः पश्चात् स्नानं विधिवदाचरेत्"। वामनपुराणम् "नाभिमात्रजले गत्वा कृत्वा केशान् द्विधा द्विजः। निरुध्य कर्णौ नासाञ्च त्रिःकृत्वो मज्जनं ततः"। तत्रैव वृद्धयाज्ञवल्क्यः "स्रोतसां संमुखो मज्जेत् यत्रापः प्रवहन्ति वै। स्थावरेषु गृहे चैव सूर्य्यसम्मुख आप्लवेत्"। हारीतः "नातुरो न भुक्त्वा न जीर्णवासा न बहुवासा न नग्नो नाश्नन् नावस्कार्यिको नालङ्कृतो नाजस्रं नाज्ञाते जले नाकूले नाशुचौ न प्रभूतजले न नाभेरल्पजले न चत्वरे नोपद्वारे न सन्ध्यायां न निशायां स्नायादिति"। चत्वरे काकादिवलिस्थले इति श्रीदत्तः। उपद्वारे द्वारसमीपे। अत्रैतेन मुनिना नग्नबहुवाससोर्निषेधस्याभिधानात् स्नाने द्विवासस एवाधिकारः प्रतीयते। एकवस्त्रस्नाने दोषमाह समुद्रकरधृतभविष्ये शौनकः "एकवस्त्रेण यत्स्नानं मूर्च्छा विघ्नेन चैव हि। स्नातस्तु न भवेत् शुद्धः क्रिया च परिहीयते"। अतएव "स्नानं तर्पणपर्य्यन्तं कुर्य्यादेकेन वाससा" इति यदि समूलं तदा प्रेततर्पणपरमिति "तत्रैकवस्त्रा ज्ञातयः" इत्यादिना एकवस्त्रत्वविधानात्। "एकेन एकजातीयेन" इति वाचस्पतिमिश्राः। "येन वाससा स्नानं कृतं जलस्थस्तु तेनैव तर्पणम्" इति कल्पतरुस्मार्णवः। न च "स्नानशाट्यान्तु दातव्या मृदस्तस्मो विशुद्धये। जलमध्ये तु यः कश्चित् द्विजातिस्नानदुर्बलः। निष्पीडयति यद्वस्त्रं स्नानं तस्य वृथा भवेत्" इति वशिष्ठवचने स्नानशाट्यामिति तद्वस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रत्वमिति